लब्धविद्यार्ज्जितधने तु सर्व्वेषां मूर्खामूर्खाणामंशित्वम्। विद्याधनं यथा, यदि भवान् भद्रमुपन्यस्यति तदा भवते एतावद्धनं दातव्यं इति पणितं तत्र भद्रोपन्यासेन यत् पणितं धनं लब्धं तत्। अध्यापितशिष्याद्यल्लब्धम्। ऋत्विक्कर्म्मकरणेन यजमानाद्दक्षिणादिरूपं लब्धं धनम्। यत्किञ्चित् विद्यायाः प्रश्ने कृते तत्र सम्यगुत्तरेण परितोषादपणितमेव किञ्चिद्धनं ददाति तत्। यो ह्यस्मिन् शास्त्रार्थे मम संशयमपनयति तस्मै सुवर्णादिकमिदं दास्यामीत्युक्ते तस्य संशयमपनीय यल्लब्धम्। वादिनोः कुत्रचिद्वादविषयसन्देहे न्यायकरणार्थमागतयोः सम्यङ्निरूपणेन यल्लब्धम्। शास्त्रादिषु स्वज्ञानं प्रकाश्य प्रतिग्रहादिना यल्लब्धम्। तथात्यर्थवादाद्वादविचारे वा परं निर्जित्य यल्लब्धम्। एकस्मिन् देये वस्तुनि बहूनां ब्राह्मणानां समुत्थाने येन प्रकृष्टं वेदमधीत्य यल्लब्धम्। चित्रकरसुवर्णकारादिभिः शिल्पिभिर्मूल्यादधिकं यल्लब्धम्। द्यूतेनापि परं निर्जित्य यल्लब्धम्। एतानि अविभाज्यानि ॥ * ॥

क्रमादभ्यागतं द्रव्यमन्येन हृतं यदि दायादानामनुमत्या तेषामेकतरेण साधारणधनानुपघातेन इतरव्यापारनैरपेक्ष्येण च धनमुद्धरति तदा तद्धनमुद्धारकर्त्तुरेव। भूमिस्तु यदि अन्यैर्हृता एकेनोद्धृता तदा स तुरीयांशं गृहीत्वा अवशिष्टभागत्रयं अन्यैः सह समं विभजेत्। अयं निष्कर्षः विभक्तेनाविभक्तेन वा साधारणधनानुपघातेनापरव्यापारनैरपेक्ष्येण येन यदर्ज्जितं तदर्ज्जकस्यैव न तु तद्विभाज्यमितरैः। किन्तु विद्यालब्धधनमात्रे विशेषः स च प्रागेवाभिहितः। अङ्गयोजितं वस्त्रालङ्कारं अश्वादिवाहनं तड्डुकादिकूपवाप्यादिगतं पित्रादिसम्बन्धिजलं दासीव्यतिरिक्ता स्त्री गोप्रचाररथ्या एतानि नान्यधनवद्विभाज्यानि किन्तु स्वव्यापारेण तद्ग्रहीतव्यं एवं स्वस्वव्यापारोपयुक्तशयनभोजनपात्रादि न विभजनीयं येन यद्गृहीतं तत्तस्यैव। पुस्तकन्तु मूर्खेन ग्राह्यं किन्तु पण्डितेन तदन्तर्गतस्वांशतुल्यद्रव्यान्तरं मूल्यमेव वा दत्त्वा ग्रहीतव्यं एवं शिल्पिनां शिल्पोपयुक्तद्रव्यं नाशिल्पिनां तत्रापि पुस्तकवद्व्यवस्था। पितरि जीवति यस्मिन् वास्तौ येन गृहोद्यानादिकं कृतं तस्य न विभागः यद्यपरेणापि वास्त्वन्तरे तथा कृतम् ॥ * ॥

अथ संसृष्टविभागक्रमार्थमादौ संसर्गो निरूप्यते।

पितृभ्रातृपितृव्याणामन्यतरेण सह विभक्तः सन् पुनरन्योन्येच्छया पूर्व्वकृतविभागमपेक्ष्य यत्तव धनं तन्मम धनं यन्मम तत्तवापीति व्यवस्थया एकगृहिरूपतयावस्थानं संसर्गः ॥ अथ संसृष्टविभागः। अत्र भ्रातॄणां अन्येषां तुल्यसम्बन्धिनां वा संसर्ग्यसंसर्गिणां मध्ये संसर्गिणामेव प्रथमं मृतसंसर्गिधनेऽधिकारः। तदभावे तथाविधासंसर्गिणामिति क्रमः ॥*॥ एवं यदा पिता पुत्त्रान् विभज्य यथाशास्त्रं भागं गृहीत्वा पुत्त्रैः सहासंसृष्ट एव पुत्त्रान्तरमुत्पाद्य मृतस्तदा विभागानन्तरजात एव तद्धनाधिकारी न पूर्व्वविभक्तः एवं पूर्व्वभ्रातृविभागेऽपि विभक्तजस्य नांशित्वम्। यदि तु येन केनचित् पुत्त्रेण संसृष्टः सन् पिता मृतः तदा तद्धनं संसृष्टविभक्तजाभ्यां समं विभाज्यं यथा धने तथर्णेऽपि। यद्यविज्ञातगर्भायामेव स्त्रियां पुत्त्रा विभक्तास्तद्गर्भजातो विभक्तद्रव्याण्येकीकृत्य पुनर्विभज्य स्वांशं गृह्णीयात् न तु विभक्तजेन सह पितृद्रव्येऽंशित्वम् ॥*॥

अथ पितृकृतविभागो निरूप्यते।

यत्र पितृकृतविभागस्तत्र स्वोपार्जितधने पितुरिच्छैव नियामिका। पितामहधने तु मातृरजोनिवृत्तिसहकृता तदिच्छा नियामिका। स्वोपार्जितधने पिता इच्छया धनं ग्रहीतुं शक्नोति कस्मैचिदधिकं कस्मैचिन्न्यूनं दातुमर्हति। पैतामहधनविभागे तु पिता स्वयमंशद्वयं गृहीत्वा पुत्त्रेभ्य एकैकांशं दद्यात्। किन्तु पैतामहमणिमुक्ताप्रवालादिषु पितुः स्वाच्छन्द्यं भूमिनिबन्धद्विपदान्यतमे न स्वाच्छन्द्यम्। स्वार्जितधनविभागे पित्रा अपुत्त्रपत्नीभ्यः पुत्त्रतुल्यांशो देयः यदि ताभ्यः स्त्रीधनं न दत्तं स्त्रीधने दत्ते सति अर्द्धं देयम्। पुत्त्रकर्त्तृकविभागे तु विमातुरंशाभावः ॥*॥ शूद्रस्य दासीपुत्त्रोऽपि पितुरिच्छया परिणीतस्त्रीजातपुत्त्रेण सह तुल्याधिकारी मृते पितरि तदंशार्द्धाधिकारी। तथाविधभ्रात्रभावे दौहित्रे चासति पितुः सर्व्वधनाधिकारी सति दौहित्रे तेन सह तुल्याधिकारी ॥ * ॥ पितरि मृते मातरि जीवन्त्यां पुत्त्राणां विभागो न धर्म्म्यः यदि जीवन्त्यां मातरि विभागं कुर्व्वन्ति तदा मातापि पुत्त्रतुल्यांशभागिनी। विमातुरंशाभावः किन्तु सा ग्रासाच्छादनादिना भर्त्तव्या। एवं पितामहधने पौत्त्रैर्विभाज्यमाने पितामह्यः पौत्त्रतुल्यांशभागिन्यः ॥ * ॥ औरसेन दत्तकादीनां विभागे औरसस्य द्व्यंशित्वं सवर्णदत्तकादेरेकैकांशित्वम्। विभागस्तु पित्रादेर्धनिनः ऋणं परिशोध्य तदवशिष्टधनस्य करणीयः। उत्तमर्णेच्छया विभज्य वा तदृणं परिशोधनीयम्। एकेन भ्रात्रादिना बहुपोष्यतया यन्नाधिकं भुक्तं तत्र न विभुक्तांशो विभागमध्ये प्रवेशनीयः। किन्तु भुक्तावशिष्टस्य विद्यमानधनस्यैव विभागः कार्य्यः ॥*॥ असंस्कृतभ्रातृभगिनीनां पैतृकधनेन संस्कारः कर्त्तव्यः। विभागकाले केनचिन्निह्नुतस्य पश्चात् प्राप्तस्य समभागः कर्त्तव्यः। भ्रमादिना कृताशास्त्रीयविभागधनस्य पुनः शास्त्रीयविभागः कार्य्यः ॥*॥

अथ विदेशागतस्य विभागः।

विभक्ततादशायां देशान्तरगतस्य चिरकालानन्तरागतस्य सप्तमपुरुषपर्य्यन्तं तत्सन्ततेरपि सौलसामन्तादिना दा स्वज्ञापनपूर्व्वकं क्रमागतधनात् यथाशास्त्रमंशभागित्वमिति स्थितं एषा व्यवस्था विदेशागतविषयिणी देशस्थविषये तु धनिनश्चतुर्थपर्य्यन्त एव तद्धनविभागार्हता। साधारणधनेऽपि स्वांशदानं कर्त्तव्यम्। इति श्रीकृष्णतर्कालङ्कारकृतक्रमसंग्रहः ॥ * ॥

"देशस्य जातेः संघस्य धर्म्मो ग्रामस्य यो भृगुः।
उदितः स्यात् स तेनैव दायभागं प्रकल्पयेत् ॥"

इति दायतत्त्वम् ॥

दायविभागः, पुं, (दायस्य विभागः।) दायभागः। यथा। "किं दायस्य विभागो विभक्तावयवत्वं किंवा दायेन सह विभागोऽसंश्लिष्टत्वम्।" इति जीमूतवाहनः ॥

दायादः, पुं, (आदत्ते इति। आ+दा+"आतश्चोपसर्गे।" ३।१।१३६। इति कः। दायस्य आदः ग्राहकः।) सपिण्डः। पुत्त्रः। इत्यमरः। ३।३।८८॥ (यथा, महाभारते। १। ८५। २।
"पुरुणा तु कृतं वाक्यं मानितश्च विशेषतः।
कनीयान् मम दायादो धृता येन जरा मम ॥")

दायादी, स्त्री, (दायं अत्तीति। अद्+अण्। स्त्रियां ङीप्।) कन्या। इति शब्दार्थकल्पतरुः ॥

दायितः, त्री, (दाय दाने+णिच्+क्तः।) दापितः। इत्यमरटीकायां भरतः ॥

दारकः, पुं, (दारयति नाशयति जनकस्य विपद्भयमिति। दॄ+णिच्+ण्वुल्।) पुत्त्रः। इति हेमचन्द्रः। ३।२०६॥ (यथा, महाभारते। १।८३।१३।
"कस्यैते दारका राजन् देवपुत्त्रोपमाः शुभाः।
वर्च्चसा रूपतश्चैव सदृशा मे मतास्तव ॥")
बालकः। इति मेदिनी। के, १०३ ॥ (यथा, महाभारते। १। ८३। १६।
"शर्म्मिष्ठां मातरञ्चैव तथा चक्रुश्च दारकाः ॥")
दासकः। इति शब्दार्थकल्पतरुः ॥ ग्राम्यशूकरः। इति राजनिर्घण्टः ॥

दारकः, त्रि, (दारयतीति। दॄ+णिच्+ण्वुल्।) भेदकः। इति मेदिनी। के, १०३ ॥ (यथा,—
"अशोघ्नदुर्नामकरोगदारकं
करोति वृद्धं सहसैव दारकम् ॥"
इति वैद्यकचक्रपाणिसंग्रहेऽर्शोऽधिकारे ॥")

दारकर्म्म, क्ली, (दारार्थं पत्न्यर्थं यत् कर्म्म।) विवाहः। इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते। १। १४। २६।
"दारकर्म्म ततो व्यासः शुकस्य पर्य्यचिन्तयत् ॥")

दारणं, क्ली, (दारयति नाशयति जलमलमनेनेति। दॄ+णिच्+करणे ल्युट्।) कतकम्। इति शब्दचन्द्रिका ॥ (दॄ+णिच्+भावे ल्युट्।) विदारणम्। यथा, "दारुदारणपट्वैः" समाहृतम्। इति लीलावती ॥ (व्रणादिस्फोटनसम्पादक औषधविशेषः। यथा, सुश्रुते। १। ३६।
"चिरविल्वोऽग्निको दन्ती चित्रको हयमारकः।
कपोतगृध्रकङ्कानां पुरीषाणि च दारणम् ॥
क्षारद्रव्याणि वा यानि क्षारो वा दारणं परम् ॥"
दारयतीति। दॄ+णिच्+कर्त्तरि ल्युः। विदारके, त्रि। यथा, महाभारते। ८। ४६। १७।
"समाधत्त शितं वाणं गिरीणामपि दारणम् ॥")